मुद्रित पृष्ठ : 3 अनुक्रमांक ......................

**स/56**

# मध्यमा ( प्रथम वर्ष ) परीक्षा, 2015

## वेद

## ( विशिष्ट विषयः )

## पञ्चं प्रश्नपत्रम्

## शुक्लयजुर्वेद

***समयः - घंटात्रयम्*** ***पूर्णाङ्काः - 100***

***( प्रश्नपत्रप्राप्तिसमनन्तरमेव अस्योपरि स्वीयोऽनुक्रमाङ्कः लेख्यः )***

**1.** अधोलिखितेषु यथेच्छं **चतुर्णां** विनियोग-पूर्वक-व्याख्या विधेया- 60

(क) अग्नेर्जनित्रमसि वृषणौ स्थ उर्वश्यस्या युरसि पुरूरवा असि।
गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि।।

(ख) अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभि शस्तिपावा।
सनः स्योनः सुयजा यजेह देवेभ्यो हव्य ँ सदमप्रयुच्छन्त्स्वाहा।।

P.T.O.

(ग) स्वराऽसि सपत्नहा सत्रराऽस्यभिमातिहा जनराऽसि रक्षोहा सर्वराऽस्यमित्रहा।।

(घ) अग्ने व्रतपास्त्वे व्रतपा या तवतनूरिय ㆁ सा मयि यो मम तनूरेषा सा त्वयि। सहनौ व्रतपते व्रतान्यनु मे दीक्षांदीक्षा पतिर्मन्यता मनु तपस्तपस्पतिः।।

(ङ) इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पा ㆁ सुरे स्वाहा।।

**2.** निम्नलिखितमन्त्रेषु महीधर भाष्यं लिखत – 30

(क) विष्णोर राटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा।।

(ख) उरु विष्णो विक्रमस्वोरूक्षयाय नस्कृधि।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा।।

(ग) विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा।

**3.** शुक्लयजुर्वेद संहितायाः पञ्चमाध्यायस्य सारांशं लिखत। 5



स/56

**4.** निम्नलिखित शब्देषु व्याख्यां लिखत – 5

(क) मधुमति।

(ख) दभ्नोति

(ग) सुभव।

(घ) आज्यं।

(ङ) शिष्टं।